योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ०५

अज्ञातलेखकः

श्रीवाल्मीकिरुवाच ।

अथोनषोडशे वर्षे वर्तमाने रघूद्वहे ।

रामानुयायिनि तथा शत्रुघ्ने लक्ष्मणेऽपि च ।। १ ।

भरते संस्थिते नित्यं मातामहगृहे सुखम् ।

पालयत्यवनिं राज्ञि यथावदखिलाभिमाम् ।। २

जन्यत्रार्थं च पुत्राणां प्रत्यहं सह मन्त्रिभिः ।

कृतमन्त्रे महाप्राज्ञे तज्ज्ञे दशरथे नृपे ।। ३ ।

कृतायां तीर्थयात्रायां रामो निजगृहे स्थितः ।

जगामानुदिनं कार्श्यं शरदीवामलं सरः ।। ४

कुमारस्य विशालाक्षं पाण्डुतां मुखमाददे ।

पाकफुल्लदलं शुक्लं सालिमालमिवाम्बुजम् ।। ५

कपोलतलसंलीनपाणिः पद्मासनस्थितः ।

चिन्तापरवशस्तूष्णीमव्यापारो बभूव ह ।। ६

कृशाङ्गश्चिन्तया युक्तः खेदी परमदुर्मनाः ।

नोवाच कस्यचित्किंचिल्लिपिकर्मार्पितोपमः ।। ७

खेदात्परिजनेनासौ प्रार्थ्यमानः पुनः पुनः ।

चकाराह्निकमाचारं परिम्लानमुखाम्बुजः ।। ८

एवंगुणविशिष्टं तं रामं गुणगणाकरम् ।

आलोक्य भ्रातरावस्य तामेवाययतुर्दशाम् ।। ९

तथा तेषु तनूजेषु खेदवत्सु कृशेषु च ।

सपत्नीको महीपालश्चिन्ताविवशतां ययौ ।। १०

का ते पुत्र घना चिन्तेत्येवं रामं पुनः पुनः ।

अपृच्छत्स्निग्धया वाचा नैवाकथयदस्य सः ।। ११

न किंचित्तात मे दुःखमित्युक्त्वा पितुरङ्कगः ।

रामो राजीवपत्राक्षस्तूष्णीमेव स्म तिष्ठति ।। १२

ततो दशरथो राजा रामः किं खेदवानिति ।

अपृच्छत्सर्वकार्यज्ञं वसिष्ठं वदतां वरम् ।। १३

इत्युक्तश्चिन्तयित्वा स वसिष्ठमुनिना नृपः ।

अस्त्यत्र कारणं श्रीमन्मा राजन्दुःखमस्तु ते ।। १४

कोपं विषादकलनां विततं च हर्षं

नाल्पेन कारणवशेन वहन्ति सन्तः ।

सर्गेण संहृतिजवेन विना जगत्यां

भूतानि भूप न महान्ति विकारवन्ति ।। १५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रक्रणे कार्श्यनिवेदनंनाम पञ्चमः सर्गः ।।५।।